# GOD AND THE UNIVERSE: RELIGIOUS AND SCIENTIFIC APPROACHES



Edited by

Dr. Manoranjan Das

CamScanner

# GOD AND THE UNIVERSE : RELIGIOUS AND SCIENTIFIC APPROACHES

(Collection of Papers from the UGC Sponsored National Seminar)

Edited By

**Dr. Manoranjan Das**

MAHA BODHI BOOK AGENCY
4A, Bankim Chatterjee Street
Kolkata - 700 073, INDIA
2017

CamScanner

# GOD AND THE UNIVERSE : RELIGIOUS AND SCIENTIFIC APPROACHES

Edited By

Dr. Manoranjan Das

All rights reserved, including those of translations into other languages.
No part of this book may be reproduced, stored in a retrieval
system, or transmitted in any form, or by any means,
electronic, mechanical, photocopying, recorded
or otherwise without the written
permission of the
publisher.

© Principal, Mugberia Gangadhar Mahavidyalaya

First Published : Dolpurnima, 2018

*Published by* :
D.L.S. JAYAWARDANA
MAHA BODHI BOOK AGENCY
4-A, Bankim Chatterjee Street
Kolkata-700 073 (India)
Phone : 9831077368
Email : mahabodhibookagency@hotmail.com

*Printed by* :
Sagarika Press, Kolkata-700 009

ISBN : 978-93-84721-73-2

Price : ₹ 500.00

CamScanner

# न्यायवैशेषिकमते जगत् तथा ईश्वरः

डॉ मनोरञ्जनदासः
शम्भु मान्ना

१. जगत् (सृष्टिः)- सृष्टिविषये भारतीयदर्शनेषु ये ये वादाः यथा आरम्भ-विवर्त-परिणाम-स्वभावाः स्वीकृताः सान्ति तेषु न्यायवैशेषिकाणाम् आरम्भवादोऽन्यतमः। आरम्भस्य प्रारम्भस्य वादः परीक्षापूर्वककथाभेदः 'आरम्भवादः'। अयमपि असत्कार्यवाद इत्यपि नाम्ना परिचीयते। यस्मिन् वादे सिद्धान्ते वा पार्थिवादिषु चतुर्षु परमाणुषु क्रिया उत्पद्यते द्व्यणुकत्र्यसरेण्वादिक्रमेण तस्य महतोऽर्थात् जगतः सृष्टिरभूदिति निर्णयोऽभूत् स एव 'आरम्भवादः'। उक्तं च—

पृथिव्यप्वह्निवायूनां क्रियासंयोजिताणवः।
द्व्यणुकादिक्रमेणैवमारम्भन्ते इदं महत्॥ इति।

अत्र महत्-शब्देन जगत्-इति बोध्यम्। यथा पार्थिवादिवाय्वन्त-परमाणुपुञ्जेभ्य एवेदं जगदुत्पद्यते। यस्मिन् वादे सिद्धान्ते वा उपादानकारणमविकृतं सत् तस्मादेव विषमाकारेण कार्यं समुत्पद्यत इति निर्णयोऽभूत्-स 'विवर्तवादः'। कारणाद्विषमसत्ताकतयोत्पद्यमान-कार्यविषयकसिद्धान्तो विवर्तवादः। यथा-ब्रह्मणो जगत्, रङ्गाच्च रजतमिति। अत्र जगत् प्रति उपादानकारणस्य ब्रह्मणो रजतं च प्रति उपादानकारणस्य रङ्गात्मकधातोर्विकाराभावेऽपि विषमकार्ये उपद्येते तदुभयतः। यस्मिन् वादे सिद्धान्ते वा उपादानकारणस्य स्वभावः कार्यरूपेण परिणमते इति सिद्धान्तितोऽभूत् असौ 'परिणामवादः'। उपादानकारणस्य स्वभावपरित्यागेन कार्यकारणपरिणतिविषयकसिद्धान्त एव परिणामवादः। यथा दुग्धाद्दधि, दंध्नश्च नवनीतमित्यादिः। चार्वाकास्तु स्वभाववादिनः। हेत्वन्तरानपेक्षो वस्तुधर्मविशेषः स्वभावः। एतच्च यत्र तत्त्वरूपेण वर्णितं स 'स्वभाववादः'। यथा—

अग्निरुष्णो जलं शीतं शीतस्पर्शस्तथानिलः।
केनेदं चित्रितं तस्मात्स्वभावात्तद्व्यवस्थितिः॥

एवं च दार्शनिकैः कार्यकारणयोरभेदप्रमाणीकरणार्थमेव व्यासदेवेन वेदान्तदर्शने विवर्तवादः, कपिलेन साङ्ख्यदर्शने परिणामवादश्च स्वीकृतः। केचन दार्शनिकाः 'अवच्छेदवादम्' एकदेशवादं वा, केचन 'आभासवादं', 'प्रतिविम्बवादं' वा, केचन 'एकजीववादं', केचन पुनः 'नानाजीववादं' स्वीकृतवन्तः। न्यायवैशेषिकमतानुसारं क्षित्यप्तेजोमरुतां परमाणवः एव भवन्ति परिदृश्यमानस्यास्य जगतः मूलं कारणम् उपादानकारणं वा। न्यायवैशेषिकाः अपि वेदान्तिनामिव नैककारणवादिनः। एतन्मते कार्यमात्रं प्रति त्रीणि कारणानि भवन्ति, यथा समवायिकारणमसमवायिकारणं निमित्तकारणं चेति। अतः न्यायवैशेषिकाः बहुकारणवादिनः। सृष्टिं प्रति परमाणवः समवायिकारणम्, परमाणुद्वयसंयोगोऽसमवायिकारणम्, ईश्वरो न समवायिकारणं नाप्यसमवायिकारणम् अथ च कारणं तदेव निमित्तकारणम्।

२. **वैशेषिकनये सृष्टिहेतु** :- एतन्नये सृष्टिं प्रति प्राणिमात्रस्य अदृष्टानामेव कारणता न ईश्वरस्य साक्षाद्धेतुत्वम्। 'अग्नेरूर्द्ध्वज्वलनं वायोस्तिर्यग्गमनमणूनां मनसश्चाद्य कर्मादृष्टकारित्वम्' इति सूत्रे कणादेन स्वयं तत्स्वीकारात्। अग्नेरूर्द्ध्वगमनम्, वायोस्तिर्यग्गमनम्, परमाणूनां मनसश्च आद्यक्रिया एतत्सर्वम् अदृष्टेनैव निष्पद्यते इति सूत्रार्थः। अदृष्टं नाम वेदादिधर्मशास्त्रोक्तसदसत्कर्मानुष्ठानजन्यफलभोगान्तस्थायी सँस्कारविशेषो गुणविशेषो वा। एतद्दृष्टजन्यशुभाशुभफलभोगाय शरीरस्यैवावश्यकता अस्ति। 'भोगायतनं शरीरम्' इति कथनात्। जीवानां दुःखनिवृत्तौ मोक्षलाभो द्रव्यादिसप्तपदार्थानां तत्त्वज्ञानलाभो वा। पदार्थतत्त्वज्ञानलाभेन अदृष्टं विनङ्क्षति। सत्यदृष्टविनाशे जीवस्य मोक्षलाभो भवति। अदृष्टवशेनैव परमाणुषु क्रिया जायते। तस्याः क्रियायाः सृष्टिरुत्पन्नत्वेन अदृष्टानां परमाणूनां च सकलपदार्थानां मूलकारणता। ईश्वरस्य तु सृष्ट्या सह नास्ति कश्चित्सम्बन्धः। अदृष्टमन्तरेणात्मना सह शरीरसंयोगाभावात्। तच्छरीरसंयोगाभाव एव आत्यन्तिकदुःखनिवृत्तिर्मोक्षो वा इति वैशेषिकाणामभिप्रायः।

३. **न्यायदर्शने ईश्वरः**- ईश्वरस्यास्तित्वं न्यायवैशेषिकैः स्वीकृतमस्ति। यद्यपि न्यायवैशेषिकसूत्रेषु कुत्रापि ईश्वरस्योपरि सूत्रं नोपलभ्यते तथापि द्वादशप्रमेयानामुल्लेखनकाले आत्मन उल्लेखात् परोक्षभावेन ईश्वरोऽङ्गीकृतः।

एतन्मते ईश्वरो न समवायिकारणं जगतः, किं तु निमित्तकारणमेव। ईश्वरो नित्यश्चैतन्यवान्। अतः जडद्रव्याणां (जगतः) उपादानकारणं भवितुं नार्हेत्। जडद्रव्याणां जडद्रव्याण्येव समवायिकारणं भवेत्। प्रमेयसूत्रे उल्लिखितस्य आत्मपदस्य द्विविधोऽर्थः-जीवात्मा परमात्मा चेति। तत्र परमात्मा ईश्वर एव। स नित्यज्ञानवान्, नित्येच्छावान्, नित्यकृतिमान्, सर्वज्ञः, अनादिः, सर्वव्यापकः, सर्वशक्तिमान्। सो न निर्गुणः सगुण एव। नित्यज्ञानादयः परमात्मनः गुणाः भवन्ति। न्यायवैशेषिकमते ईश्वरो न ज्ञानस्वरूपः किं तु ज्ञानाधिकरणः एव। ईश्वरः जगतः सृष्टिस्थितिलयानां निमित्तकारणम्। परमाणुरेव उपादानकारणम्। परमाणुः निरवयवो नित्यश्च। दिक्कालाकाशः जगतः सहकारिकारणानि। दिक्कालाकाशात्ममनांसि नित्यानि, अतः एतानि न ईश्वरसृष्टानि। केवलमेक्षां विन्यस्तीकरणमेव ईश्वरस्य कार्यम्। स जीवस्यादृष्टानुसारं परमाणुसाहाय्येन जगत्करोति, ईश्वर एकः नानेकः, अणिमाद्यष्टैश्वर्यशाली च।

४. **ईश्वरस्यास्तित्वसाधकं प्रमाणम्**—प्रख्यातनैयायिकोदयनाचार्यः तस्य न्यायकुसुमाञ्जलिग्रन्थे निरीश्वरवादिनां मतं खण्डयितुं प्रतिपादितवान्।—

न्यायचर्चेयमीशस्य मननव्यपदेशभाक्।
उपासनैव क्रियते श्रवणानन्तरा गता॥

(न्या. कु., प्रथमस्तवकम्-१/३)

ईश्वरस्य यौक्तिकविचारं तस्मिन्मननञ्च विना नान्यः विद्यते मोक्षलाभायपन्थाः। ईश्वरस्य श्रवणादनन्तरं तस्मिन् मननं कुर्यात्। पुनस्तस्य उपासना अपि विधेया-इत्यस्य श्लोकस्यार्थः। विशेषतः न्यायदर्शने ईश्वरसिद्ध्यर्थं अनेकाः युक्तयः प्रदर्शिताः सन्ति। अनुमानप्रमाणमस्य प्रधानमवलम्बनम्। न्यायकुसुमाञ्जलौ (पञ्चमस्तवके) उदयनाचार्येण अष्टौ युक्तयः प्रस्तूयन्ते। तद्यथा—

कार्यादायोजन-धृत्यादेः पदात्प्रत्ययतः श्रुतेः।
वाक्यात्सङ्ख्याविशेषाच्च साध्यो विश्वविदव्ययः॥

(न्या. कु., पञ्चमस्तवकम्-५/१)

अत्र मया त्रीणि उदाहरणानि प्रदर्शितानि।

४.१. कार्यकारणसम्पर्कितप्रमाणम्–परमाणूनां संयोगेनोत्पन्नस्यास्य जगतः कश्चन कारणमवश्यं स्यात्। यतः एव जगदपि घटपटादीनामिव कार्यवस्तु तत एवास्य किमपि कारणं भवितव्यम्। घटस्य कुलाल इवास्य परिदृश्यमानस्य सुमहतः जगतः कारणमवश्यं भवेत् स ईश्वर एव। उक्तञ्च विश्वनाथेन न्यायसिद्धान्तमुक्तावल्याम्—क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वात् घटवदिति। कार्योत्पत्तौ व्यापारस्य प्रयोजनं भवति। व्यापारं विना न किमपि कार्यमुत्पद्यते इति लोकैरपि ज्ञायते। व्यापारश्च कर्तृजन्यः भवति। कर्तरि व्यापारः साक्षाद्भावेन जायते। व्यापाराश्रयः कर्ता इति नियमात्। पृथिव्यादिपदार्थानामुत्पत्तौ किं केवलं पार्थिवादिपरमाणूनां प्रयोजनं भवति? परमाणूनां विन्यस्तीकरणस्य किं प्रयोजनं नास्ति? यदि विन्यासकरणं न स्यात् तदा जलीयेभ्यो परमाणुभ्योऽपि पृथिव्या उत्पत्तिर्जायेत। तथा न दृश्यते तत्र विन्यासकारिणः सद्भावात्। कश्चासौ विन्यासकारी, सो न अस्मद्दृशं मनुष्यं भवितुं शक्नोति। परिमितशक्तिमत्त्वात्। अतः स एव ईश्वरः नान्यः।

४.२. अदृष्टसम्पर्कितप्रमाणम्—इदं जगद्वैचित्र्यपूर्णम्। अनन्तकोटिजीव-जन्तवोऽस्मिन् धरातले वसन्ति। परं न कस्याप्येकस्य जीवस्यापरजीवेन सह किमपि साम्यम् अस्ति। न च रूपेण गुणेन आकृत्या, न च कर्मकरणेन अथ वा कर्मफलभोगेन सह सामञ्जस्यं कस्यचिदेकस्य अपरेण सह मिलति। मनुष्येषु कश्चन धनी अस्ति चेत् अन्यः कश्चिन्निर्धनः, कश्चिद्विद्वान् भवति चेदपरः पुनः मूर्खः। कश्चिदद्दुःखी कश्चिच्च दुःखी। एतेषां वैचित्र्याणां किमस्ति कारणम्? अस्माभिः ज्ञायते न किमपि कार्यं वा घटनं कारणं विना सम्भवति। कश्चन शिशुः धनिकस्य गृहे जायते चेत् तस्य सुखभोगः जन्मन एव आरम्भते। अपर कश्चन शिशुः अस्मिन्नेव भूमण्डले स्थित्वापि यदि दरिद्रकुले सम्भवेत् तेन पुनः जन्मनः कष्टमनुभूयते। किमस्ति शिशुद्वयोर्मध्ये पार्थक्यं—वयोगतम् उत देशगतम्? किं तु तयोर्भोगेषु महत्पार्थक्यं दृश्यते किमर्थम्? उच्यते। इदं हि पूर्वजन्मार्जितकर्मफलानुसारि सम्भवति। अन्यः प्रश्नः स्यात्—पूर्वजन्मार्जितस्य कर्मणः फलमस्मिन् जन्मनि केन रूपेण संसरति ? अदृष्टद्वारा इत्यस्योत्तरम्। को नामासौ अदृष्टः? यः शुभाशुभकर्मजन्यं यथाक्रमं पापपुण्यानां

संस्कारसमूहः स एव अदृष्टः। जीवानाम् अदृष्टः जीवैरेव स्वस्वकर्मणा अर्जितो भवति। परमसौ अदृष्टः अचेतनः। अत अचेतनोऽयमदृष्टः केनचित्सचेतनेन नियन्त्रितः भवेत्। स ईश्वर एव भवति। अत्रैव अदृष्टाधिष्ठातृरूपेण ईश्वरस्यास्तित्वमवश्यं स्वीकर्तव्यम्।

४.३. **वेदभित्तिकप्रमाणम्**—अस्मिन् विषये शङ्कराचार्येण शारीरकभाष्ये उक्तम्—''महत ऋग्वेदादेः शास्त्रस्यानेकविद्यास्थानोपबृंहितस्य प्रदीपवत् सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म। न हि ईदृशस्य शास्त्रस्य ऋग्वेदादिलक्षणस्य सर्वगुणान्वितस्य सर्वज्ञादन्यतः सम्भवोऽस्ति।'' अस्मादेव प्रमाणीभवति ईश्वरस्यास्तित्वमवश्यमेव स्वीकर्तव्यम्।

५. **उपसंहार** :- न्यायशास्त्रं वास्तववादि तथा बहुत्ववादि दर्शनमस्ति। असंख्यपरमाणवः असंख्यजीवात्मा ईश्वरश्चेति एतेषां पदार्थानां पृथक्सत्ता नैयायिकैः स्वीकृता। अन्येऽपि पदार्थाः सन्ति यथा आकाशकालादयः सर्वे एतन्मते पृथक्सत्ताकाः भवन्ति। एते सर्वे पदार्थाः नित्याः शाश्वताश्च। तत्र परमाणुद्वारा ईश्वरः जगत्सृजति। यथा कुम्भकारो यथा वा स्वर्णकारः घटालङ्कारादीन् निर्माति तथा ईश्वरोऽपि। न्यायदर्शने ईश्वरेण सह जीवात्मनः, तेनैव सह जगतः भेदोऽपि स्वीकृतो भवति। यद्यपीश्वरः जीवात्मना सह एकस्मिन्नेव आत्मद्रव्ये अन्तर्भूक्तः, तथापि तयोर्भेदः एव कल्पितो नैयायिकैः। एवं च जीवात्मा ईश्वरः जगत्—एतेष्वपि त्रिषु भिन्नत्वं प्रतिपादयद्भिः नैयायिकैः न कोऽप्येषु आन्तरिकसम्बन्धः उल्लिख्यते—

न्यायनये ईश्वरो न जगति अन्तर्गतोऽस्ति। तेन जगत् सृष्ट्वा विरम्यते। स जगद्बहिरेव तिष्ठति। ईश्वरस्य जगत्सर्जनकर्म कुम्भकारस्य घटसृष्टिरिव। परमाणुद्वारा जगत्करोतीश्वरः। सोऽपि सर्वशक्तिमान्निति नैयायिकैरुच्यते—तथापि न तस्येश्वरस्य परमाणुसर्जने कापि क्षमता अस्ति। किं नायं सिद्धान्तः आश्चर्यजनकं लगति!

एवञ्च जीवेश्वरयोः यः संबन्धः न्यायविद्भिः स्वीकृतोऽस्ति, तत्र तैरुक्तमस्ति—'यथा पिता अपत्यानाम्'। अनेन तयोः (जीवेश्वरयोः) बहिरेव सम्बन्धो न कश्चिन्नियन्त्रणकारिसम्बन्धः स्थापितो भवति। किं

तु ईश्वरः जीवात्मा च उभयमेव आत्मपदार्थेऽन्तर्भूक्तम्। उभौ शाश्वतौ सर्वव्यापिनौ। यद्येवं स्वीक्रियेत यत्-ईश्वरः जीवात्मनि अधिष्ठाय तमेव जीवात्मानं परिचालयतीति—तेन का हानिः भूयेदिति दिक्?

## ग्रन्थसूचि :


1. श्रीमन्माधवाचार्यकृतः *सर्वदर्शनसंग्रहः*, हिन्दीभाष्यकारोमाशङ्करशर्मर्षिः, चौखम्बाविद्याभवनम्, वाराणसी-७, क्रीष्टाब्दः, १९८४।
2. श्रीमहामहोपाध्यायभीमाचार्यविरचितः *न्यायकोशः*, Bhandarkar Oriental Research Institute, Pune-4, 1917-1977.
3. *भारतीय दर्शन (हिन्दी)*, श्रीजगदीशचन्द्र मिश्र, Motilal Banarsidass (MLBD), 40 U.A. Bunglow Road, Jawahar Nagar, Delhi-110007.
4. *चतुःसूत्री-ब्रह्मसूत्रशाङ्करभाष्यम्* (हिन्दीव्याख्या), आचार्य विश्वेश्वर सिद्धान्तशिरोमणिः, चौखम्बा विद्याभवन, वाराणसी-१, १९९२।
5. *श्रीशङ्कराचार्चकृत-ब्रह्मसूत्रभाष्यम्*, (English-Translation & Explanatory Notes) by Swami Gambhirananda, Advaita Ashrama, 5 Dehi Entally Road, Kolkata-14, 1993.
6. *केशवमिश्रप्रणीता तर्कभाषा* (English), सम्पादक, एस्. आर्. अय्यर, चौखम्भा ओरियन्टालिया, वाराणसी, १९७९, पृ. ५।
7. *श्रीदामोदरशास्त्रिकृता सर्वदर्शनकौमुदी*, ओडिशा साहित्य अकादमी, भूवनेश्वर, ११७५, पृ. ६३।